**संस्कृतवार्ता:**

**दिनाङ्क :-25.10.2024**

**प्रात: - 06:55**

**<u>जर्मनीदेशस्य कुलाधिपतिः</u>**

**प्रधानमन्त्री नरेन्द्रमोदी जर्मनीदेशस्य कुलाधिपतिः ओलाफ् श्कोल्ज: च अद्य नवदिल्ल्यां सप्तमस्य अन्तासर्वकारीपरामर्शस्य (IGC) इत्यस्य सह-अध्यक्षतां करिष्यतः। कुलाधिपतिः श्कोल्ज: गतरात्रौ भारतस्य त्रिदिवसीययात्रायाः कृते नव-दिल्ल्यां सम्प्राप्तवान्। अन्तासर्वकारीपरामर्श: एकः समग्रः सर्वकारीयरूपरेखा अस्ति यस्य अन्तर्गतं उभयोः पक्षयोः मन्त्रिणः स्वस्वदायित्वक्षेत्रेषु चर्चां कुर्वन्ति, स्वविचार विनिमयोः परिणामानां विषये प्रधानमन्त्रिणे कुलाधिपतये च प्रतिवेदनानि प्रदास्यन्ति। अद्य उभयोः नेत्रोः मध्ये द्विपक्षीयवार्ता अपि भविष्यति यत्र सुरक्षा-रक्षा-सहकार्यं, वर्धितं गहन आर्थिकसहकार्यं, हरित-स्थायि-विकास-सहभागिता, उदीयमानं-रणनीतिक-प्रौद्योगिकी-क्षेत्रे सहकार्यादीनां विषये च चर्चा भविष्यति । जर्मनव्यापारस्य अष्टादश तमे एशियाप्रशान्तसम्मेलने अपि उभौ नेतारौ सम्बोधनं करिष्यतः।**

**<u>सीसीईए-परियोजना:</u>**

**आर्थिक-प्रकरणानां मन्त्रिमण्डलीय-समित्या अष्टनवत्यधिक-सप्तशतोत्तर-षड्सहस्रकोटि-रुप्यकाणां द्वाभ्यां रेलपरियोजनाभ्यां कृते स्वीकृति: प्रदत्ता। प्रथम-परियोजनायां नरकटियागंजत: रक्सौल-सीतामढ़ी-दरभंगापर्यन्तं रेलवे-संपर्कताया: द्विविधीकरणं जातं तथैव सीतामढ़ी-मुजफ्फरपुरखण्डौ अपि तत्र सम्मिलितौ स्त:। अयं मार्ग: षड्-पञ्चादधिक-द्विशत किलोमीटर परिमितं विस्तृत: वर्तते। इयं परियोजना नेपालपूर्वोत्तरभारतयो: सहैव सीमवर्तीक्षेत्रेषु च संपर्कतां दृढीकरिष्यति। अनेन यात्रिणां कृते गमनागमनं सुकरं भविष्यति तथैव क्षेत्रस्य सामाजिकार्थिक-विकास: अपि भवति।**

केन्द्रीय-मन्त्रिमण्डलस्य उपवेशनानन्तरं नवदिल्ल्यां वार्ताहरान् विज्ञापयन् सूचना एवं प्रसारणमन्त्री अश्विनी-वैष्णव: प्रोक्तवान् यत् सी. सी. ई. ए. इत्यनेन अमरावती-माध्यमेन एर्रूपलम-नम्बुरु इत्यनयो: मध्ये नूतनाय-रेलसंपर्काय स्वीकृति: प्रदत्तास्ति। अस्य विस्तारस्तावत् सप्तपञ्चाशत् किलोमीटर-यावत् भविष्यति।

<u>अग्रिम मुख्यन्यायाधीशः</u>

न्यायाधीशः संजीवखन्ना भारतस्य अग्रिमः मुख्यन्यायाधीशः नियुक्तः अस्ति। एकस्मिन् सामाजिकसंजालियसन्देशे विधिमन्त्री अर्जुनराममेघवालः अवदत् यत् राष्ट्रपतिः द्रौपदी मुर्मुः, मुख्यन्यायाधीशेन डी वाय चन्द्रचूडेन सह परामर्शं कृत्वा न्यायाधीशाय खन्ना वर्याय नवम्बर् मासस्य एकादश दिनांकात् भारतस्य मुख्यन्यायाधीशरूपेण नियुक्तवती। न्यायाधीशः खन्ना सम्प्रति सर्वोच्चन्यायालयस्य द्वितीयः वरिष्ठतमः न्यायाधीशः अस्ति । सः भारतस्य एकपञ्चाशत्तमः मुख्यन्यायाधीशः भविष्यति । न्यायाधीशः खन्ना पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य मईमासस्य त्रयोदशदिनाङ्के सेवानिवृत्तः भवितुम् अर्हति। न्यायाधीशः संजीवखन्ना ऊनविंशत्यधिक द्विसहस्रतम वर्षस्य जनवरी मासस्य अष्टादश दिनाङ्के सर्वोच्चन्यायालयस्य न्यायाधीशत्वेन उन्नतः अभवत्। वर्तमानः मुख्यन्यायाधीशः डीवाई चन्द्रचूडः द्वाविंशत्यधिक द्विसहस्रतम वर्षस्य नवम्बर् मासस्य नवमे दिनाङ्के कार्यभारं स्वीकृतवान् आसीत्, सः अस्मिन् वर्षे नवम्बर् मासस्य दशमे दिनाङ्के सेवानिवृत्तः भविष्यति।

<u>दाना-चक्रवात:</u>

भारतस्य ऋतु विभागेन दाना इति चक्रवातस्य मध्य रात्रौ ओडिशातटस्थ भीतरकनिका उद्याने -धामरा पत्तन क्षेत्रयो: मध्ये प्रवेशस्य पुष्टीकृता।

।।इति वार्ता:।।